Mahabharata.

# श्रीमहाभारतम्।

श्रीमन्महर्षि वेदव्यासविरचितम्।

आदिपर्व्व। Adiparva vol. 1

रायोपाधिकेन श्रीप्रतापचन्द्रेण

प्रकाशितम्

68.756

मूल्यं विना वितीर्णञ्च।

"हस्तपादादिसम्पन्ना यूयं किमवसीदथ"

---

LIBRARY
AUG 5 1897
U.S. BUREAU of EDUCATION.

तृतीयसंस्करणम्।

कलिकाता वीडन् ष्ट्रीटान्तर्गत
नं १ राजागुरुदास ष्ट्रीट् भारतयन्त्रे
श्रीप्रतापचन्द्ररायेण मुद्रितम्।

शकाब्दाः १८०९।

1809

रण वदान्यतैव सास्मान् सवलयति। आशास्महे च वयमधुना सर्व्वेषामेवार्य्यतनूजानां भारतीयानामनुकूलतरातिप्रशस्तं हस्तालम्बनम्। निष्किञ्चनीकृतेऽप्यस्मिन् भारते ऐहिकामुष्मिकसुखसाधनमत्यनर्घं दिव्यं धर्म्मरत्नं नाधुनापि हृतम्। अतस्तद्रक्षणार्थं सर्व्वे समाहिताः सततं यतत। आर्य्याः खलु धर्म्मधनैरेव धनिकाः। धर्म्ममेव ते बहुमन्यन्त। धर्म्म एव तेषां माहात्म्यं गौरवञ्च प्रतिष्ठितम्। यावद्धर्म्मस्तिष्ठति तावत् न तेषां किमपि गतम्। धिगस्मान् यद्वयमेतादृशस्य धर्म्मरत्नस्य प्रभवोऽपि सीदामः। यद्यन्यत् सर्व्वं याति यातु धर्म्मं सर्व्वात्मना रक्षथ नचिरादवश्यमेवेह परत्र च समृद्धाः प्रतिष्ठिताश्च भविष्यथ।

वक्तव्यञ्चैवेदमुपसंहारे यद्धूर्त्तानां वञ्चनावारणार्थं डा[illegible]योगेन प्रकाशितपुस्तकानां प्रेषणनियमो व्यवस्थापितस्तद्[illegible]र्थञ्च प्रतिनिबन्धं किञ्चिद्‌ग्रहीष्यत इत्यलं विस्तरेण।

दातव्यभारतकार्य्यालयः<br>योड़ासांको कलिकाता।<br>शकाब्दाः १८०४।

श्रीप्रतापचन्द्र रायः।

## तृतीयसंस्करणस्य विज्ञप्तिः।

द्वितीय संस्करणे यदुक्तम् तृतीय संस्करणेऽस्मिन् तदतिरिक्तं बहु वक्तव्यं नास्ति। एतावतैव बहु भविष्यतीति यत् द्वितीय संस्करणे मुद्रितानि भारतखण्डानि प्रायशः शेषतामुपगतानि। आवेदक संख्याच प्रतिदिनं वर्द्धत एव। अतोऽनुरुद्धा एव वयं तृतीयसंस्करणमारब्धवन्तः। निःशेषित खण्डानि च उभयतो मुद्र्यन्ते। अन्यतश्च प्रथम संस्करणे मुद्रितानि उत्तरखण्डानि तृतीय संस्करणे मुद्रितानां खण्डानां समसंख्यया मुद्र्यन्ते। एवञ्च यथा संस्करणत्रय एव ग्राहकमिश्रा युगपदेव सम्पूर्णं पुस्तकं प्राप्नुवन्ति तथैवास्माकमुद्देशः। अर्थिणस्तूर्णं मावेदयन्त्विति विज्ञापयाम इति।

श्रीप्रतापचन्द्र रायः।

# NOTICE.

The "Dātavya Bhārata Kāryālaya" is not in the habit of singing its own pæons of triumph. From time to time, however, it becomes necessary to lay before the public a brief history of its operations. If in recounting the work done by the institution, comparisons are suggested for showing the extent and value of that work, the reader, it is hoped, will, without ascribing it to a spirit of boastfulness, refer it to the true motive, *viz.*, the necessity there is for the "Kāryālaya" to vindicate its existence and its claims to public patronage.

The Sanskrit edition of the *Mahābhārata* was commenced in 1882. That edition is very near completion. Before, however, half the work had been gone through, the numerous applications received from all parts of India that could not be granted from want of copies, made it manifest that a second edition was called for. The earlier fasciculi, therefore, that were exhausted, it was thought proper to reprint. The number of copies, as regards the later fasciculi, was increased so that, if only the exhausted fasciculi could be reprinted the second edition, merging with the first, would be completed at the same time with the first. Before, however, the reprint of the exhausted fasciculi could be completed and the second edition merged with the first as regards all later fasciculi, a third edition of the earlier numbers was called for. It is scarcely necessary to state that this third edition, now begun, will be managed on the same principles as the second. The advantage of this arrangement will be that the cost will be considerably lower than if a new edition had to be printed from beginning to end. Regarding time also, it may be confidently stated that with the continuance of the public support, a little more than a year would be necessary to bring up the arrears, and the third and second editions, accordingly will be in the hands of recipients at the same time in a state of completion.

The great Bengal edition of the Sanskrit text of the *Mahābhàrata*, printed under the auspices of the Royal Asiatic Society of Bengal, was completed in 1843. This edition, of 4 vols, consisted of 5,000 copies. Purchasers were free to buy the whole work at Rs. 80, or as many separate volumes as each liked, at the rate of Rs. 20 a volume. From 1843 to 1888 is a period of about 45 years. Is it not remarkable that although so many years have elapsed since the publication of the Bengal edition, a considerable number of odd volumes should still remain undisposed off? Compared to this, has not the success achieved by the

*Kāryālaya* been marked? Between the three editions issued by the *Kāryālaya*, the number of copies struck off is about 10,000. No doubt, the success of the *Kàryālaya* is explainable on the ground of the almost gratuitous character of its distribution. For all that, however, a craving for the *Mahābhārata* represented by 10,000 copies of that work, is no ordinary matter, considering that not one among the many splendid editions of much more popular Sanskrit works has, as regards sale, reached even half that figure.

Regarding the small amount of Rs. 6/6/0 charged in India for a complete copy of the Sanskrit *Mahàbhàrata*, it should be stated that the ratio of those charged with that sum to those who are not charged even a single pice is as *five* to *three*. Rs. 6/6 for a complete *Mahābhārata* do not cover even the charges of postal transmission and packing, including those of establishment for keeping and changing addresses and attending to other correspondence and office-rent. An absolutely gratuitous distribution in India, under the present circumstances of the *Kàryālaya*, is an impossibility. With regard to applicants at a distance we have not very often the means of judging about their circumstances, in other words, of judging whether, in view of our limited resources, we would be justified in granting their applications. The amount charged, *viz.*, Rs. 6/6/0, therefore, besides covering a portion of the necessary charges, is also a gurantee of respectability of the applicant and the *bona fides* of the application.

The "Dātavya Bhārata Kāryālaya" has now been known all over the civilised world. It is well known, besides, that it is entirely supported by the liberalilty of the princes and the people of India. The publications in which it is at present engaged will require a considerable sum before they can be brought to a state of completion. The difficulty, though great, is not insurmountable. I do not claim any credit whatever, besides mere industry, for having supervised its operations so long. I have, before now, freely said that whatever credit there may be in those operations, it belongs to my countrymen. Hitherto the progress achieved has been larely due to small sums received from all classes of persons. I will conclude with the assurance that "कपर्द्दकमपि कृपया दत्तं बहुमन्यामहे ॥"

PRATAPA CHANDRA ROY.

उदयप्रेप्सुभिर्भृत्यैरभिजात इवेश्वरः । इतिहासोत्तमे ह्यस्मि-न्नर्पिता बुद्धिरुत्तमा ॥ ३९ ॥ स्वरव्यञ्जनयोः कृत्स्ना लोक-वेदाश्रयेव वाक् । तस्य प्रज्ञाभिपन्नस्य विचित्रपदपर्वणः ॥ ४० ॥ सूक्ष्मार्थन्याययुक्तस्य वेदार्थैर्भूषितस्य च । भारतस्येतिहासस्य श्रूयतां पर्वसंग्रहः ॥ ४१ ॥ पर्वानुक्रमणीपूर्वं द्वितीयः पर्व-संग्रहः । पौष्यं पौलोममास्तीकमादिवंशावतारणम् ॥ ४२ ॥ ततः सम्भवपर्वोक्तमद्भुतं रोमहर्षणम् । दाहो जतुगृहस्यात्र हैडिम्बं पर्व चोच्यते ॥४३॥ ततो वकबधः पर्व पर्व चैत्ररथं ततः । ततः स्वयम्वरो देव्याः पाञ्चाल्याः पव चोच्यते ॥ ४४ ॥ क्षात्र धर्मेण निर्ज्जित्य ततो वैवाहिकं स्मृतम् । विदुरागमनं पर्व राज्यलाभ-स्तथैव च ॥ ४५ ॥ अर्जुनस्य वने वासः सुभद्राहरणं ततः । सुभद्रा हरणादूर्द्ध्वं ज्ञेयं हरणाहारिकम् ॥ ४६ ॥ ततः खाण्डवदाहाख्यं तत्रैव भयदर्शनम् । सभापर्व ततः प्रोक्तं मन्त्रपर्व ततः परम् ॥ ४७ ॥ जरासन्धवधः पर्व पव दिग्विजयं तथा । पर्व दिग्वि-जयादूर्द्ध्वं राजसूयिकमुच्यते ॥ ४८ ॥ ततश्चार्घाभिहरणं शिशु-पालवधस्ततः । द्यूतपर्व ततः प्रोक्तमनुद्यूतमतः परम् ॥ ४९ ॥ तत आरण्यकं पर्व किर्मीरवध एव च । अर्जुनस्याभिगमनं पर्व ज्ञेयमतः परम् ॥ ५० ॥ ईश्वरार्जुनयोर्युद्धं पर्व कैरातसंज्ञि-तम् । इन्द्रलोकाभिगमनं पर्व ज्ञेयमतः परम् ॥ ५१ ॥ नलो-पाख्यानमपि च धार्मिकं करुणोदयम् । तीर्थयात्रा ततः पर्व कुरुराजस्य धीमतः ॥ ५२ ॥ जटासुरवधः पर्व यक्षयुद्धमतः परम् । निवातकवचै युद्धं पर्व चाजगरं ततः ॥ ५३ ॥ मार्क-ण्डेयसमस्या च पर्वानन्तरमुच्यते । संवादश्च ततः पर्व द्रौपदी-सत्यभागयोः ॥ ५४ ॥ घोषयात्रा ततः पर्व मृगस्वप्नोद्भवस्ततः । ब्रीहिद्रौणिकमाख्यानमैन्द्रद्युम्नं तथैव च ॥ ५५ ॥ द्रौपदीहरणं पर्व जयद्रथविमोक्षणम् । पतिव्रताया माहात्म्यं सावित्र्या-

व्रजन्तं खगश्रेष्ठं वज्रेणेन्द्रोऽभ्यताड़त्॥ १८ ॥ हरन्तममृतं रोषाद्गरुड़ं पक्षिणां वरम्। तमुवाचेन्द्रमाक्रन्दे गरुड़ः पततां वरः॥ १९ ॥ प्रहसन् श्लक्ष्णया वाचा तथा वज्रसमाहतः। ऋषेर्मानं करिष्यामि वज्रं यस्यास्थिसम्भवम्॥ २० ॥ वज्रस्य च करिष्यामि तवैव च शतक्रतो। एतत् पत्रं त्यजाम्येकं यस्यान्तं नोपलप्स्यसे॥ २१ ॥ न च वज्रनिपातेन रुजा मेऽस्तीह काचन। एवमुक्त्वा ततः पत्रमुत्ससर्ज्ज स पक्षिराट्॥ २२ ॥ तदुत्सृष्टमभिप्रेक्ष्य तस्य पर्णमनुत्तमम्। हृष्टानि सर्व्वभूतानि नाम चक्रुर्गरुत्मतः॥ २३ ॥ सुरूपं पत्रमालक्ष्य सुपर्णोऽयं भविष्यति। तद्दृष्ट्वा महदाश्चर्य्यं सहस्राक्षः पुरन्दरः। खगो महदिदं भूतमिति मत्वाभ्यभाषत॥ २४ ॥

शक्र उवाच। वलं विज्ञातुमिच्छामि यत्ते परमनुत्तमम्। सख्यञ्च चानन्तमिच्छामि त्वया सह खगोत्तम॥ २५ ॥

इत्यादिपर्व्वणि सौपर्णे त्रयस्त्रिंशोऽध्यायः॥ ३३ ॥

---

गरुड़ उवाच। सख्यञ्च मेऽस्तु त्वया देव यथेच्छसि पुरन्दर। वलन्तु मम जानीहि महच्चासह्यमेव च॥ १ ॥ कामं नैतत् प्रशंसन्ति सन्तः स्ववलसंस्तवम्। गुणसङ्कीर्त्तनं चापि स्वयमेव शतक्रतो॥ २ ॥ सखेति कृत्वा तु सखे पृष्टो वक्ष्याम्यहं त्वया। न ह्यात्मस्तवसंयुक्तं वक्तव्यमनिमित्ततः॥३॥ सपर्व्वतवनामूर्व्वीं ससागरजलामिमाम्। वहे पक्षेण वै शक्र त्वामप्यत्रावलम्बिनम्॥४॥ सर्व्वान् सम्पीड़ितान्वापि लोकान् सस्थाणुजङ्गमान्। वहेयमपरिश्रान्तो विद्धीदं मे महद्वलम्॥ ५ ॥

सौतिरुवाच। इत्युक्तवचनं वीरं किरीटी श्रीमतांवरः। आह शौनक देवेन्द्रः सर्व्वलोकहितः प्रभुः॥ ६ ॥ एवमेव यथात्थ

मीनभावमनुप्राप्ता बभूव यमुनाचरी ॥ ५८ ॥ श्येनपादपरिभ्रष्टं तद्वीर्य्यमथ वासवम् । जग्राह तरसोपेत्य साद्रिका मत्स्यरूपिणी ॥ ५९ ॥ कदाचिदपि मत्सीं तां बबन्धुर्मत्स्यजीविनः । मासे च दशमे प्राप्ते तदा भरतसत्तम ॥ ६० ॥ उज्जह्रुरुदरात्तस्याः स्त्रीं पुमांसञ्च मानुषम् । आश्चर्य्यभूतं तद्गत्वा राज्ञेऽथ प्रत्यवेदयन् ॥ ६१ ॥ काये मत्स्या इमौ राजन् सम्भूतौ मानुषाविति । तयोः पुमांसं जग्राह राजोपरिचरस्तदा ॥ ६२ ॥ स मत्स्यो नाम राजासीद्धार्मिकः सत्यसङ्गरः । साप्सरा मुक्तशापा च क्षणेन समपद्यत ॥ ६३ ॥ या पुरोक्ता भगवता तिर्य्यग्योनिगता शुभा । मानुषौ जनयित्वा त्वं शापमोक्षमवाप्स्यसि ॥ ६४ ॥ ततः सा जनयित्वा तौ विशस्ता मत्स्यघातिना । सन्त्यज्य मत्स्यरूपं सा दिव्यं रूपमवाप्य च ॥ ६५ ॥ सिद्धर्षिचारणपथं जगामाथ वराप्सराः । सा कन्या दुहिता तस्या मत्स्या मत्स्यसगन्धिनी ॥ ६६ ॥ राज्ञा दत्ता च दाशाय कन्येयं ते भवत्विति । रूपसत्त्वसमायुक्ता सर्वैः समुदिता गुणैः ॥ ६७ ॥ सा तु सत्यवती नाम मत्स्यघात्यभिसंश्रयात् । आसीत् सा मत्स्यगन्धैव कञ्चित्कालं शुचिस्मिता ॥ ६८ ॥ शुश्रूषार्थं पितुर्नावं वाहयन्तीं जले च ताम् । तीर्थयात्रां परिक्रामन्नपश्यद्वै पराशरः ॥ ॥ ६९ ॥ अतीव रूपसम्पन्नां सिद्धानामपि काङ्क्षिताम् । दृष्ट्वैव च स तां धीमांश्चकमे चारुहासिनीम् ॥ ७० ॥ दिव्यां तां वासवीं कन्यां रम्भोरुं मुनिपुङ्गवः । सङ्गमं मम कल्याणि कुरुष्वेत्यभ्यभाषत ॥ ७१ ॥ साब्रवीत् पश्य भगवन् पारावारे स्थितानृषीन् । आवयोर्दृष्टयोरेभिः कथं तु स्यात्समागमः ॥ ७२ ॥ एवं तयोक्तो भगवान्नीहारमसृजत् प्रभुः । येन देशः स सर्वस्तु तमोभूत इवाभवत् ॥ ७३ ॥ दृष्ट्वा सृष्टन्तु नीहारं ततस्तं परमर्षिणा । विस्मिता साभवत् कन्या व्रीडिता च तपस्विनी ॥ ७४ ॥

तथा भीष्मः शान्तनवो गङ्गायाममितद्युतिः ॥ ९० ॥ वसुवीर्य्यात्समभवन्महावीर्य्यो महायशाः । वेदार्थविच्च भगवानृषिर्विप्रो महायशाः ॥ ९१ ॥ शूले प्रोतः पुराणर्षिरचौरश्चौरशङ्कया अणीमाण्डव्य इत्येवं विख्यातः स महायशाः ॥ ९२ ॥ स धर्ममाहूय पुरा महर्षिरिदमुक्तवान् । इषीकया मया बाल्यादिहा ह्येका शकुन्तिका ॥ ९३ ॥ तत्किल्विषं स्मरे धर्म नान्यत् पापमहं स्मरे। तन्मे सहस्रसमितं कस्मान्नेहाजयत्तपः ॥ ९४ ॥ गरीयान् ब्राह्मणवधः सर्वभूतवधाद्यतः । तस्मात्त्वं किल्विषी धर्म शूद्रयोनौ जनिष्यसि ॥ ९५ ॥ तेन शापेन धर्मोऽपि शूद्रयोनावजायत। विद्वान् विदुररूपेण धार्मी तनुरकिल्विषी ॥ ९६ ॥ सञ्जयो मुनिकल्पस्तु जज्ञे सूतो गवल्गणात्। सूर्य्याच्च कुन्तिकन्यायां यज्ञे कर्णो महाबलः ॥ ९७ ॥ सहजं कवचं बिभ्रत्कुण्डलोद्योतिताननः । अनुग्रहार्थं लोकानां विष्णुर्लोकनमस्कृतः ॥ ९८ ॥ वसुदेवात्तु देवक्यां प्रादुर्भूतो महायशाः। अनादिनिधनो देवः स कर्त्ता जगतः प्रभुः ॥ ९९ ॥ अव्यक्तमक्षरं ब्रह्मप्रधानं त्रिगुणात्मकम् । आत्मानमव्ययञ्चैव प्रकृतिं प्रभवं प्रभुम् ॥ १०० ॥ पुरुषं विश्वकर्माणं सत्त्वयोगं ध्रुवाक्षरम् । अनन्तमचलं देवं हंसं नरायणं प्रभुम् ॥ १०१ ॥ धातारमजमव्यक्तं यमाहुः परमव्ययम्। कैवल्यं निर्गुणं विश्वमनादिमजमव्ययम् ॥ १०२ ॥ पुरुषः स विभुः कर्त्ता सर्वभूतपितामहः। धर्मसंवर्द्धनार्थाय प्रजज्ञेऽन्धकवृष्णिषु ॥ १०३ ॥ अस्त्रज्ञौ तु महावीर्य्यौ सर्वशास्त्रविशारदौ। सात्यकिः कृतवर्मा च नारायणमनुव्रतौ ॥ १०४ ॥ सत्यकाद्धृदिकाच्चैव जज्ञातेऽस्त्रविशारदौ । भरद्वाजस्य च स्कन्नं द्रोण्यां शुक्रमवर्द्धत ॥ १०५ ॥ महर्षेरुग्रतपसस्तस्माद् द्रोणो व्यजायत। गौतमान्मिथुनं जज्ञे शरस्तम्बाच्छरद्वतः ॥ १०६ ॥ अश्वत्थाम्नश्च जननी कृपश्चैव महाबलः।

अश्वत्थामा ततो जज्ञे द्रोणादेव महाबलः ॥ १०७ ॥ तथैव धृष्ट-
द्युम्नोऽपि साक्षादग्निसमद्युतिः। वैताने कर्मणि तते पावकात्
समजायत ॥ १०८ ॥ वीरो द्रोणविनाशाय धनुरादाय वीर्य्य-
वान्। तत्रैव वेद्यां कृष्णापि जज्ञे तेजस्विनी शुभा ॥ १०९ ॥
विभ्राजमाना वपुषा बिभ्रती रूपमुत्तमम्। प्रह्लादशिष्यो
नग्नजित् सुबलश्चाभवत्ततः ॥ ११० ॥ तस्य प्रजा धर्म्महन्त्री जज्ञे
देवप्रकोपनात्। गान्धारराजपुत्रोऽभूच्छकुनिः सौबलस्तथा ॥१११॥
दुर्य्योधनस्य जननी जज्ञातेऽर्थविशारदौ। कृष्णद्वैपायनाज्जज्ञे
धृतराष्ट्रो जनेश्वरः ॥ ११२ ॥ क्षेत्रे विचित्रवीर्य्यस्य पाण्डुश्चैव
महाबलः। धर्म्मार्थकुशलो धीमान्मेधावी धूतकल्मषः ॥ ११३ ॥
विदुरः शूद्रयोनौ तु जज्ञे द्वैपायनादपि। पाण्डोस्तु जज्ञिरे पञ्च
पुत्रा देवसमाः पृथक् ॥ ११४ ॥ द्वयोः स्त्रियोर्गुणज्येष्ठस्तेषामासी-
द्युधिष्ठिरः। धर्म्माद्युधिष्ठिरो जज्ञे मारुताच्च वृकोदरः ॥ ११५ ॥
इन्द्राद्धनञ्जयः श्रीमान् सर्वशस्त्रभृतां वरः। जज्ञाते रूपसम्पन्ना-
वश्विभ्याञ्च यमावपि ॥ ११६ ॥ नकुलः सहदेवश्च गुरुशुश्रूषणे
रतौ। तथा पुत्रशतं जज्ञे धृतराष्ट्रस्य धीमतः ॥ ११७ ॥
दुर्य्योधनप्रभृतयो युयुत्सुः करणस्तथा। ततो दुःशासनश्चैव
दुःसहश्चापि भारत ॥ ११८ ॥ दुर्मर्षणो विकर्णश्च चित्रसेनो
विविंशति। जयः सत्यव्रतश्चैव पुरुमित्रश्च भारत ॥ ११९ ॥
वैश्यापुत्रो युयुत्सुश्च एकादश महारथाः। अभिमन्युः सुभद्राया-
मर्जुनादभ्यजायत ॥ १२० ॥ स्वस्रीयो वासुदेवस्य पौत्रः पाण्डो-
र्महात्मनः। पाण्डवेभ्यो हि पाञ्चाल्यां द्रौपद्यां पञ्च जज्ञिरे
॥ १२१ ॥ कुमारा रूपसम्पन्नाः सर्वशास्त्रविशारदाः। प्रति-
विन्ध्यो युधिष्ठिरात् सुतसोमो वृकोदरात् ॥ १२२ ॥ अर्जुनाच्छ्रुत-
कीर्त्तिस्तु शतानीकस्तु नाकुलिः। तथैव सहदेवाच्च श्रुतसेन
प्रतापवान् ॥ १२३ ॥ हिड़िम्बायाञ्च भीमेन वने जज्ञे घटोत्-

स्तकिरीटहारा विनिश्वसन्त श्रमयाम्बभूवुः ॥ १९ ॥ हाहाकृतं तद्धनुषा दृढेन विस्रस्तहाराङ्गदचक्रवालम्। कृष्णानिमित्तं विनिभुक्तकामं राज्ञां तदा मण्डलमार्त्तमासीत् ॥ २० ॥ सर्वान्नृपास्तान् प्रसमीक्ष्य कर्णो धनुर्द्धराणां प्रवरो जगाम। उद्धृत्य तूर्णं धनुरुद्यतं तत्सज्यं चकाराशु युयोज वाणान् ॥ २१ ॥ दृष्ट्वा सूतं मेनिरे पाण्डुपुत्रा भित्त्वा नीतं लक्ष्यवरं धरायाम्। धनुर्धरा रागकृतप्रतिज्ञमत्यग्निसोमार्कमथार्कपुत्रम ॥ २२ ॥ दृष्ट्वा तु तं द्रौपदी वाक्यमुच्चैर्ज्जगाद नाहं वरयामि सूतम्। सामर्षहासं प्रसमीक्ष्य सूर्य्यं तत्याज कर्णः स्फुरितं धनुस्तत् ॥ २३ ॥ एवं तेषु निवृत्तेषु क्षत्रियेषु समन्ततः॥ चेदीनामधिपो वीरो वलवानन्तकोपमः ॥ २४ ॥ दमघोषसुतो धीरः शिशुपालो महामतिः। धनुरादायमानस्तु जानुभ्यामगमन्महीम् ॥ २५ ॥ ततो राजा महावीर्य्यो जरासन्धो महावलः। धनुषोऽभ्यासमागत्य तस्थौ गिरिरिवाचलः ॥ २६ ॥ धनुषा पीडयमानस्तु जानुभ्यामगमन्महीम्। तत उत्थाय राजा स स्वराष्ट्राण्यभिजग्मिवान् ॥ २७ ॥ ततः शल्यो महावीर्य्यो मद्रराजो महावलः। तदप्यरोप्यमानस्तु जानुभ्यामगमन्महीम् ॥ २८ ॥ तस्मिंस्तु संभ्रान्तजने समाजे निक्षिप्तवादेषु जनाधिपेषु। कुन्तीसुतो जिष्णुरियेष कर्त्तुं सज्यं धनुस्तत्सशरं प्रवीरः ॥ २९ ॥

इत्यादिपर्वणि स्वयम्वरपर्वणि राजपराङ्मुखे जन-
नवत्यधिकशततोऽध्यायः ॥ १८९ ॥

---

वैशम्पायन उवाच। यदा निवृत्ता राजानो धनुषः सज्यकर्मणः। अथोदतिष्ठद्विप्राणां मध्याज्जिष्णुरुदारधीः ॥ १ ॥ उदक्रोशन्विप्रमुख्या विधुन्वन्तोऽजितानि च। दृष्ट्वा सम्प्रस्थितं

